श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १८
Shree Somnath Sanskrit University Grantha Series – 18

त्रैयह्निकः अन्ताराष्ट्रियपरिसंवादः

"भाष्यपरम्परा ज्ञानप्रवाहश्च"

Three Day International Conference On

TRADITION OF COMMENTARIES AND THE DYNAMICS OF KNOWLEDGE

( 11 – 13 February, 2020 )

# भाष्यावास्यम्

## शोधपत्रसारांशाः

## Summaries of Research Papers

Chief Editor
**Prof. Gopabandhu Mishra**
*Vice-Chancellor,* Shree Somnath Sanskrit University, Veraval

Editors
**Prof. D. N. Pandeya,** *Chief Coordinator*
**Dr. Dipesh Vinod Katira,** *Coordinator*
**Dr. Janakisharan Acharya,** *Coordinator*

**Shree Somnath Sanskrit University, Veraval**

Scanned with CamScanner

प्रकाशकः
डॉ. दशरथ जादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवनमार्गः, वेरावलम् – ३६२ २६६ गीर-सोमनाथजनपदम् (गुजरातम्)
दूरभाषः – 02876 – 244532, फेक्स – 244417
www.sssu.ac.in

सहायकसम्पादकः संयोजकश्च
डॉ. कार्तिक पण्ड्या, संशोधनाधिकारी

© Shree Somnath Sanskrit University, Veraval-2020
The statements and views expressed by the scholars/authors of abstract (summaries) in this compendium are their own and not necessarily of the Editors.

प्रथमसंस्करणम् – February, 2020 - 350 प्रतिरूपाणि
ISBN : 978-93-83097-39-5

मुद्रकः
Jalaram Graphics & Offset
Behind Hotel Kaveri, S.T. Road, Veraval-362 266

Scanned with CamScanner

# श्रीमद्भागवतदशमस्कन्धीयगोपीगीते विविधव्याख्यानां वैशिष्ट्यविमर्शः

प्राचार्यः डो.नरेन्द्रकुमारः एल. पण्ड्या
प्राचार्यः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी-कोलेज
वेरावल, गुजरात

## (१) भूमिका-

संस्कृतवाङ्मयं विशालं वैविध्यपरिपूर्णं च विद्यते। तत्र पौरषेयवाङ्मये पुराणानामपि समावेशो विद्यते। पुराणेषु तिलकायमानं श्रीमद्भागवतं साक्षाद्भगवत्स्वरूपो भक्तिमुक्तिप्रदो ग्रन्थः। पुराणानामुपरि बहुविधव्याख्याग्रन्था न प्रायेण सपुपलभ्यन्ते किन्तु श्रीमद्भागवतस्यास्तीदं सुमहद्वैशिष्ट्यं यदस्य पुराणस्योपरि विविधाचार्यविरचिताः अनेका व्याख्याः प्राप्यन्ते। तत्र च सन्ति श्रीधरस्वामिविरचिता भावार्थदीपिका, श्रीवंशीधराचार्यविरचितो भावार्थदीपिकाप्रकाशः, श्रीजीवगोस्वामिकृता वैष्णवतोषिणी, श्रीरूपगोस्वामिरचिता बृहद्वैष्णवतोषिणी, श्रीवल्लभाचार्यविरचिता सुबोधिनी, श्रीविश्वनाथचक्रवर्त्तिविरचिता सारार्थदर्शिनी, श्रीगङ्गासहायकृता अन्वितार्थप्रकाशिका इत्याद्याः वह्व्यो व्याख्याः। एतासां समुपलभ्यमानव्याख्यानामाधारेण श्रीमद्भागवतदशमस्कन्धीयगोपीगीते विविधव्याख्यानां वैशिष्ट्यविमर्शोऽस्मिन् शोधपत्रे प्रस्तूयते। अनेन शोधपत्रेण विविधव्याख्याकाराणां व्याख्या शैली, विशिष्टाः सिद्धान्ताः, विविधवृत्तिभिः मुख्यार्थानां किञ्च व्यङ्ग्यार्थानां वैविध्येन प्रतिपादनम् , गुणत्रयाधारेण विशिष्टव्याख्यानम् इत्याद्याः विशेषा अवबुद्धा भविष्यन्ति।

## (२) गोपीगीतस्य परिचयस्तदीयं वैशिष्ट्यं च।

श्रीमद्भागवतं द्वादशस्कन्धात्मकं अष्टादशसहस्रश्लोकपरिमाणं भगवतः सर्गादिदशविधलीलानां वर्णनात्मकं महापुराणमस्ति। तत्र दशमस्कन्धे भगवतः श्रीकृष्णस्य प्रपञ्चविस्मरणपूर्वकभगवदासक्तिरूपनिरोधो नवत्यध्यायेषु निरूपितः। पूर्णपुरुषोत्तमस्य वाङ्मयस्वरूपस्य भागवतस्य द्वादश स्कन्धा द्वादशाङ्गानि भवन्ति। तत्र दशमस्कन्धो हृदयरूपः प्रधानमङ्गं परिगण्यते। तस्यापि हृदयस्य पञ्चप्राणायमाना रासपञ्चाध्यायी। रासपञ्चाध्याय्याश्च प्रमुखोऽध्यायो गोपीगीताख्य एकत्रिंशाध्यायः। अत्र एकोनविंशतिश्लोकैर्गोप्यः श्रीकृष्णस्य विरहे स्तोत्रात्मकं गानं चक्रुः। कनकमञ्जरीवृत्तेन गुम्फितं कनकलतामञ्जर्युपममनुपमं गोपीगीतं समाकर्ण्य श्रीकृष्णः आविरभूत् । गोपीगीतं श्रीमद्भागवतस्य हार्दं विद्यते।

## (३) गोपीगीते व्याख्याविमर्शः।

गोपीगीतस्य नैका व्याख्याः सन्ति , यत्र वैविध्येन परिपूर्णं व्याख्यानं तत्तद्व्याख्यातृभिर्विहितं चेतश्चमत्करोति। तेषु सर्वतः प्राचीनाः व्याख्याकृतो भवन्ति श्रीधरस्वामिनः , तदनु च नैके अभवन्

Scanned with CamScanner

व्याख्यातारः। विविधदार्शनिकमतानुसारिणः स्वसिद्धान्तानुगुणं व्याख्यां विदधति , तत्र तत्र अद्वैत-द्वैत-द्वैताद्वैत-विशिष्टाद्वैत-शुद्धाद्वैतानुरोधेन व्याख्याः विलसन्ति। भागवतस्य साकारब्रह्मरूपस्य श्रीकृष्णस्य लीलानिरूपकत्वात् प्रायेण चात्र भक्तिभावरसतत्त्वस्य निरूपणस्य विशिष्टतया प्राधान्यं परिलक्ष्यते।

## (४) गोपीगीते व्याख्यानां शैली।

गोपीगीते विभिन्नैराचार्यैर्विहितासु व्याख्यासु केचन आचार्याः अध्यायारम्भे अध्यायार्थं अनुष्टुब्वृत्तेन दर्शयन्ति। यथा " एकत्रिंशे निराशास्ताः पुनःपुलिनमागताः। कृष्णमेवानुगायन्त्यः प्रार्थयन्ते तदागमम् (श्रीधरस्वामी) " एवंरूपेण अन्ये अपि व्याख्यातारः अध्यायार्थं निरूपयन्ति। तदनु अन्वयक्रमेण व्याख्यां कुर्वन्ति। कोशं व्याकरणमलङ्कारशास्त्रं वेदान्तशास्त्रं चाश्रित्य विशिष्टार्थान् दर्शयन्ति।

## (५) गोपीगीते व्याख्यासु निरूपिताः भक्तिमार्गीयसिद्धान्ताः।

विविधासु इमासु व्याख्यासु भगवतः श्रवणं कीर्त्तनं स्मरणं पादसेवनम् अर्चनं वन्दनं दास्यं सख्यम् आत्मनिवेदनम् इत्येतासां नवधाभक्तीनां परमप्रेमलक्षणायाः साध्यरूपाया भक्तेश्च सिद्धान्ता उपस्थापिताः सन्ति। व्याख्यानादिषु महापुरुषाणां वचनामृतेषु इदमपि समाकर्णितं यदत्र गोपीगीते प्रभोः श्रीकृष्णस्य सर्वा लीला निरूपिताः विद्यन्ते।

## (६) गोपीगीते व्याख्यासु साम्यवैषम्यविमर्शः।

अध्यायार्थनिरूपणे साम्यं वैषम्यं च दृश्यते। प्रतिपाद्यैक्यात् साम्यं सम्भवत्येव। तथापि वैषम्यमपि विविधबुद्धिवैभवाद्विभाव्यते। निराशाः, पुनः पुलिनमागताः, करुणामय्यः, गोव्रजदेव्यः, कृष्णं तदागमं प्रार्थयन्त्यः, कृतावज्ञाः, कृष्णदिदृक्षवः, कृष्णमेव गायन्त्यः, कृष्णमेकमेवार्थयन्त्यो गोप्यः इति विशेषणपदप्रयोगैर्विशिष्टार्थः तत्तदाचार्यैर्न्यरूपि। एवमत्र साम्यदर्शनेपि विभिन्नैर्विशेषणैर्विशिष्टार्थप्रतिपादनं विलोक्यते।

## (७) गोपीगीते व्याख्यासु वागर्थवैशिष्ट्यविमर्शः।

गोपीगीतव्याख्यानकरणे सर्वे अपि व्याख्याकृतः स्वस्वपद्धत्या अन्वयक्रमेण व्याख्यां विदधते। अन्वये यत्र तत्र पदविन्यासे क्रमभेदः प्राप्यते। व्याख्यायां पदार्थप्रतिपादने समासविग्रहकरणे च प्रायेण समानता भवत्येव। क्वचिन्नानार्थकशब्देषु वाच्यार्थो विभिद्यते। व्यञ्जनाया लक्षणाया वा वृत्तेः समाश्रये शब्दस्य व्युत्पत्तिभेदेन व्याख्याकरणप्रसङ्गे अर्थवैविध्यं सम्प्राप्यते। श्रीधरस्वामिभिः व्रजशब्दस्य संज्ञापरकः अर्थो व्याख्यातः। अन्ये विविधाचार्याः व्रजशब्दविषये वैविध्येन व्याख्यानं विदधते। तद्यथा- " व्रजन्ति गोगोपाला निवासमत्रेति गोपावासस्थानम्", " व्रजेन तत्रत्या लक्ष्यन्ते"

व्याख्यातार आचार्या व्रजशब्दस्य वाच्यार्थं लक्ष्यार्थं वा स्वीकृत्य अर्थं प्रतिपादयन्तो दृश्यन्ते। अत्राऽयमपि विशेषोऽवगम्यते प्रथमश्लोके प्रथमवाक्ये व्रजपदे केचनाऽऽचार्या लक्षणया लक्ष्यार्थं

Scanned with CamScanner

गृहीतवन्तोऽन्ये पुनरभिधया मुख्यार्थमुपादाय व्याख्यानं कुर्वन्ति। ये चाचार्या प्रथमवाक्यार्थनिरूपणे लक्षणामाश्रयन्ते तेऽपि द्वितीयवाक्येऽभिधामाश्रयन्ते। यथात्र प्रथमपद्ये तथान्येष्वपि पद्येपु विविधाभिर्वृत्तिभिरर्थविशेषप्रतिपादनं विहितमाचार्यैर्व्याख्याकृद्भिः। एतदपि शोधपत्रेऽस्मिन् यथायथं निरूपयिष्यते।

## (८) गोपीगीते व्याख्यासु गुणत्रयाधारेण विशिष्टव्याख्यानम्।

श्रीमद्भागवतस्यैकादशाध्याये पञ्चविंशाध्याये गुणत्रयस्य वैशद्येन विवेचनं समुपलभ्यते। यथा- "शमो दमस्तितिक्षेक्षा तपःसत्त्यं दया स्मृतिः। तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः।। "

अत्र शमादयः सात्त्विकाः, कामादय राजसाः, क्रोधादयस्तामसाः गुणा इत्युच्यन्ते। ततद्गुणानुसारं यद्यद्वर्णनं तद्वर्णनकर्तारो वा तेषां गुणाधारेण व्याख्यानं श्रीमद्वल्लभाचार्यचरणा विदधति। दशमस्कन्धस्य प्रकरणविभागोऽपि तामसप्रकरणं राजसप्रकरणं सात्त्विकप्रकरणम् इतिरूपेण श्रीमद्वल्लभाचार्यचरणैर्विधीयते। इयमाचार्याणां विशिष्टा व्याख्यानशैली विलोक्यते।

## (९) गोपीगीते वक्त्रीणां गोपीनां प्रकारविमर्शः।

श्रीमद्वल्लभाचार्यचरणा गोपीगीते सुवोधिनीं व्याख्यां कुर्वाणाः आहुः यत् "तत्तद्वाक्यानुसारेण तासां भावो विभिद्यते" अनेन गोपीगीते गोपीभिः प्रोक्तानां वाक्यानामर्थानुसन्धानेन तासां गोपीनां मनोभावाः पृथग्विधाः सन्तीति ह्यवगतं भवति। श्रीमद्वल्लभाचार्यचरणैः त्रिवधाः सात्त्विक्यः, त्रिवधाः राजस्यः, त्रिवधाः तामस्यः, निर्गुणाश्चैकविधाः अथ च अन्यपूर्वाः अनन्यपूर्वाः इति गोपीनां द्वैविध्यमपि निरूपितमस्ति। अस्मिन् निरूपणे साहित्यशास्त्रीयस्य नायिकाभेदनिरूपणस्य प्रभावो दृश्यते।

## (१०) गोपीगीते व्याख्यानामाधारेण व्याख्याशैलीसिद्धान्तोपस्थापनम्।

गोपीगीते प्राप्यमाणानां विविधाचार्यकृतानां व्याख्यानामाधारेण आचार्याणां व्याख्याशैलीनां पन्थानः अवगताः भवन्ति। अन्वये पदार्थोक्तौ च सादृश्यं दृश्यते।व्याकरणं अलङ्कारशास्त्रं शब्दकोशान् चाश्रित्य गूढार्थप्रतिपादनं व्याख्यातारः कुर्वन्ति। गूढार्थप्रतिपादने अपि स्वसम्प्रदायानुसरणं विलोक्यते। श्रीवंशीधराचार्याः "स्वामिनस्तु, अत्र विश्वनाथाः" इत्यादिरूपेण पूर्वाचार्याणां मतान्युद्धृत्यापि व्याख्यान्ति। पदार्थनिरूपणे समानतायामपि तामसादिप्रकरणविभागं प्रमाणप्रमेयसाधन-फलाख्योपप्रकरणविभागं च आचक्षाणैः श्रीमद्वल्लभाचार्यचरणैः स्वीया विशिष्टा शैली समाश्रिता।

## (११) उपसंहारः।

पूर्वोक्तान् विमर्शविन्दून् समाश्रित्य अस्मिन् शोधपत्रे श्रीमद्भागवतदशमस्कन्धीयगोपीगीते विविधव्याख्यानां वैशिष्ट्यविमर्शः विहितोस्ति।

Scanned with CamScanner

## सन्दर्भग्रन्थसूचिः

(१) श्रीबालकृष्णग्रन्थावली,संपादकः- गोस्वामी श्याममनोहर, प्रकाशकः-
श्रीवल्लभविद्यापीठश्रीविट्ठलेशप्रभुचरण आ.हो.ट्रस्ट,कोल्हापुर, प्रका.वर्ष-वि.सं.२०५४

(२) श्रीमद्भागवतमहापुराणम् (अनेकटीकोपेतम्) , संपादकः- श्रीकृष्णसङ्कर दलसुखराम शास्त्री, प्रकाशकः-श्रीभागवतविद्यापीठम् , सोला , अहमदाबाद. प्रका.वर्ष-वि.सं.२०५२

(३) श्रीमद्भागवतमहापुराणम् (मूलमात्रम्) प्रकाशकः-गीताप्रेस,गोरखपुर. प्रका.वर्ष-पुनर्मुद्रण वि.सं.२०७२

(४) श्रीभक्तिनिकुञ्ज, संग्राहकः- श्रीकृष्णसङ्कर दलसुखराम शास्त्री,संपादकः-भागवतऋषि कर्दमऋषि शास्त्री, प्रकाशकः- श्रीकृष्णनिधि ट्रस्ट, आतिथेयम्, नडियाद. प्रका.वर्ष-पुनर्मुद्रण वि.सं.२०४९

(५) श्रीभागवतार्थप्रकरणम् अनुवादकः-गो.वा.श्रीनानुलाल गान्धी, सम्पादकः-गोस्वामी शरद् (मांडवी-कच्छ), प्रकाशकः-श्रीवल्लभाचार्यट्रस्ट,मांडवी. प्रका.वर्ष-पञ्चम संस्करण-वि.सं.२०७३

Scanned with CamScanner